**Indian J. Soc &.Pol. 1(2):73-74:2014** **ISSN :2348-0084**

# शब्दार्थसम्बन्धः

**जनार्दन झा[1]**

[1]असिस्टेंट प्रोफेसर, संस्कृत विभाग, राजकीय स्नातकोत्तर महाविद्यालय, सलेमपुर, देवरिया, उ0 प्र0 , भारत

## पूर्वपीठिका

*शब्दार्थसम्बन्धविषये वयाकरणदर्शने महाभाष्ये मञ्जूषा–भूषणप्रभृतिषु ग्रन्थेषु विशदचर्चा समवलोक्यते। वैयाकरणानां मते यस्माद् अर्थः स्फुटति स शब्दः, शब्दवाच्योऽर्थः, तयोः परस्परान्वयविधिः सम्बन्धः। शब्दार्थसम्बन्धानां वाक्यपदीये निम्नरीत्या निर्णयः प्रस्तुतो विद्यते –*

नित्याः शब्दर्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः।।
(ब्रह्मकाण्डम् पृ,४१)

सूत्राणां सानुतन्त्राणां भाष्याणाञ्च कर्तृभिः महर्षिभिः शब्दार्थसम्बन्धा नित्या आम्नाताः। भाष्ये एतदेवोपपादयितुं 'सिद्धे शब्दार्थसम्बन्धे' (महाभाष्य पस्पशाह्निक पृ0५९) इति वार्तिकं रचयामास। तत्र सिद्धशब्दो नित्यपर्यायवाचकत्वने गृहीतः, तथा च 'द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च यच्छ्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते' इति न्यायानुरोधेन सिद्धशब्दः द्वन्द्वे वृत्तिघटकं प्रत्येकेन पदेन सह अन्वीयते। अत एव सिद्धः शब्दः, सिद्धोऽर्थः, सिद्धः सम्बन्ध इति स्वरूपमवशीयते। भाष्ये विविधोदाहरणानि युक्तयश्चोपपादिता वर्तन्ते शब्दार्थसम्बन्धानां नित्यत्वप्रतिपादने।

कैश्चिद् आशङ्कयते यत् कथमवगम्यते सिद्ध–शब्दो नित्यपर्याय इति ? तर्हि सिद्धमाकाशं सिद्धा पृथ्वी इत्याद्युत्तरितम्। पुनश्च विरोधे प्रोक्तवान् यत् सिद्धः ओदनः सिद्धा यवागूः (महाभाष्य पस्पशाह्निक पृ,६०), इत्याद्युदाहरणैः सिद्धशब्दः अनित्यपर्यायोऽपि। तावत् कित्राम नित्यत्वम् ? तदनन्तरमेव नित्यानित्यत्वविचार उपपद्यते। तत्रेति समाधत्ते भाष्ये–कूटस्थेषु अविचालिषु भावेषु यद् विद्यते स नित्यः। (महाभाष्य पस्पशाह्निक पृ,६०) सिद्धमाकाशम्, सिद्धा पृथिवी (महाभाष्य पस्पशाह्निक पृ,६०) इत्यादिषु स्थलेषु सिद्धशब्दः कूटस्थत्वेन अविचालित्वेन गृहीतो विद्यते। अतो नित्यपर्याय (महाभाष्य पस्पशाह्निक पृ,६२) इत्यूहनीयम्। किन्तु कैश्चित् शब्दविद्धिः आक्षिप्यते यत् सिद्धः ओदनः सिद्धा यवागूः इत्यादिस्थले तु अनित्यपर्यायः, तत्र कूटस्थाविचाल्यभावात्। तर्हि एकस्य निषेधो वक्तव्यः, निषेधप्रतिषेधे विधिः प्राप्नोति, अर्थाद् अनित्यपर्यायभूते सिद्धे शब्दे प्रतिषेधे सति नित्यपर्यायभूतः सिद्धशब्दः प्राप्नोति। एवं रीत्या सिद्धे शब्दार्थसम्बन्धे चेति विग्रहः सम्पद्यते।अथवा विधिप्रतिषेधे निषेधः प्राप्नोति। सिद्धशब्दस्य नित्यपर्यायत्वस्य प्रतिषेधे अनित्यपर्यायः प्राप्नोति। इदमेव उदाहरणद्वारा भाष्ये प्रस्तुतरीत्या विस्तारितम्।

ग्राम्यकुक्कुटः, ग्राम्यसूकरोऽभक्ष्य (महाभाष्य पस्पशाह्निक पृ,६६) इति निषेधद्वारा वन्यकुक्कुटः वन्यसूकरो भक्ष्य इति अवगम्यते। तथा च भक्ष्यो वन्यसूकर इत्यादिना अभक्ष्यो ग्राम्यसूकर इति निषेधः प्राप्नोति। तत्र लोके नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यमिति। (महाभाष्य पस्पशाह्निक पृ,६६) तथैवात्र नियमः कर्तव्यो भवति यत् सिद्धशब्दो नित्यः आहोस्विद् अनित्य इति। यदि सिद्धशब्दः नित्यपर्यायः तर्हि स्पष्टप्रतिपत्त्यर्थं 'सिद्धे शब्दार्थसम्बन्धे (महाभाष्य पस्पशाह्निक पृ,५९) इत्यत्र सिद्धे इत्यस्य स्थाने 'नित्ये' व्यवहरेत्, तत्र वार्तिके अगादि भाष्ये–मङ्गलार्थमिति। (महाभाष्य पस्पशाह्निक पृ,६१) अर्थात् शास्त्रकारैः ग्रन्थादौ मध्ये अन्ते च मङ्गलद्वारा आरभ्यते (प्रारभ्यते) समाप्यते च तथा च सिद्धशब्दस्य मङ्गलोऽपि अर्थः कोशादिषु निर्णीतः। तस्यार्थलाभाय वार्तिके नित्ये इति नोक्त्वा सिद्धे इत्येव रचयामास। अत एव नित्यार्थलाभपूर्वकं मङ्गलार्थोऽपि सिद्धशब्देनावगम्यते।'सिद्धे शब्दार्थसम्बन्धे' (महाभाष्य पस्पशाह्निक पृ,६३)

इत्यत्र सिद्धे शब्दे अर्थे चेति विग्रहः कृतः। प्रस्तुतविग्रहः आकृतिपदार्थं मत्त्वा क्रियते। एवं हि दृश्यते लोके मृदः कयाचिदाकृत्या युक्तो पिण्डो भवति। पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते। (महाभाष्य पस्पशाह्निक पृ,२६) अपरमपि सुवर्णं कयाचिदाकृत्या युक्तो पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते।

ईश्वरेच्छा चेतनवृत्तिः, शब्दस्य अर्थस्य च अचेतनत्वात् तयोरीश्वरेच्छा न सम्भवति। कित्राम सम्बन्ध इति जिज्ञासायां तत्रैव उपपादितं च–'सम्बन्धिद्वयभित्रत्वे सति द्विष्ठतवे सति विशिष्टबुद्धि नियामकः'। (महाभाष्य पस्पशाह्निक)

घटवद् भूतलमिति प्रयोगे संयोगाश्रयो घटः भूतलमपि। एवं रीत्या संयोगाश्रयत्वे उभयोः ग्रहणं भवति। अतः संयोगः सम्बन्धः तद्रीत्या नेच्छावान् घटः, न च भूतलम्, अतः ईश्वरेच्छा कदापि सम्बन्धो भवितुं नार्हति। एवं सति कः सम्बन्ध इति प्रश्ने वाच्य–वाचकभाव एवावगन्तव्यः, तत्र वाच्योऽर्थः, वाचकः शब्दः। तयोः शब्दार्थयोः मध्ये सम्बन्धशरीरं

*1: Corresponding Author*

वाच्यवाचकत्वमिति। वाच्यवाचकत्वरूपात्मकस्य सम्बन्धस्य अपरनाम तादात्म्यमपि वैयाकरणैः स्वीक्रियते। शब्दार्थयोः तादात्म्यादेव 'ऊँ इति एकाक्षरं ब्रह्म' (ओमिति) 'रामेति द्वयक्षरं' नाम मानभङ्गः पिनाकिनः' इत्याद्युदाहरणानि सङ्गच्छन्ते।

शब्दार्थयोरभेदघटितसम्बन्धस्वीकारे कैश्चित् तार्किकैः आक्षिप्यते यत् मधुशब्दोच्चारिते सति मुखे माधुर्यापत्तिः, अग्निशब्दोच्चारिते सति मुखे माधुर्यापत्तिः, अग्निशब्दोच्चारिते सति जिह्वायां दाहकतादिदोषः समायाति। अतः सम्बन्धान्तरं मन्यताम्। तत्रोचितम्, यतो हि शब्दतत्त्वविदां मतानुरोधेन शब्दार्थयोरभेदस्वीकारेऽपि माधुर्यदाहकतादिदोषावसरो न भवति। यतो हि तैः शब्दजन्योऽर्थो बौद्धार्थः स्वीक्रियते। बुद्ध्या प्रकल्पिते अर्थे दाहकतादि नैव सम्भवति, अत एवं भर्तुहरिणाऽपि अगादि–शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' (वाक्यपदीयम्) इति विकल्पसूत्रं सङ्च्दते।

रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः लिख्यन्ते। (महाभाष्य पस्पशाह्निक पृ,६३) एवं रीत्या आकृतिविनाशद्वारा आकृतेरनित्यत्वं प्राप्नोति, तन्नोचितम्, यतो हि आकृत्युपमर्दनेऽपि आकृतौ यत्तत्त्वं तच्च ध्रुवं कूटस्थमविचाल्यनापायोजनविकार्यनुत्पत्त्यवृद्धव्ययोगिरूपेण नित्यं सिद्ध्यति। अत एव आकृतौ तत्त्वस्य नित्यत्वात् तस्याः अनित्यत्वप्रतिपादनं न युक्तम्। द्रव्यस्यापि नित्यत्वं प्रतिपादितम्। अत एव 'नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः' इति भाष्यवाक्यं सङ्गच्छते।

भाष्ये शब्दः नित्यः, अर्थः नित्यः, तयोः सम्बन्धोऽपि नित्यः। तत्र एवं विचार्यते यत् शब्दार्थयोः नित्यत्वात् तथा च नित्यपदार्थयोः समवायसम्बन्धो नित्यो भवति। तथैवानित्यपदार्थयोरपि समवाय–सम्बन्धो नित्य एव स्वीक्रियते। यथा द्रव्यजात्योः अवयवावयविनोः, तथैव वाच्यरूपे अनित्थेऽर्थे वाचकरूपस्य नित्यशब्दस्य वाच्यवाचकभावरूपः सम्बन्धो नित्य इति।

नित्यः शब्दः जातिस्फोटलक्षणः पदवाक्यरूपो व्यक्तिस्फोटरूपो वा अर्थस्यापि जातिलक्षणस्य नित्यत्वम्। द्रव्यपक्षेऽपि सर्वेषां ब्रह्मतत्त्वमेव वाच्यमिति व्यवस्थापितमस्ति व्याकरणशास्त्रे। शब्दार्थ–सम्बन्धविषये पण्डितप्रवरस्य नागेशस्य विलक्षणं मतं मञ्जूषायां परिलक्ष्यते। स च शब्दार्थयोरभेदघटितं सम्बन्धमङ्गीकरोति। तथा च नैयायिकमताभिमतं सम्बन्धं निम्नरीत्या खण्डयति। तत्र नैयायिकाः अस्माच्छब्दादयमर्थो बोद्धव्य (परमलघुमञ्जूषा पृ,२३)

इदं पदमिममर्थं बोधयितुमित्याकारिकां वेश्वरेच्छामुरीकुर्वन्ति।

भाष्याणां सूत्राणां सानुतन्त्राणां च कर्तृभिः वाक्यपदीयकारानुरोधेन शब्दार्थसम्बन्धः नित्यः कण्ठस्वरेण उपपादितः (कण्ठरवेणोपपादितः)। तत्र भगवता पतञ्जलिना 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकद्वारा शब्दार्थसम्बन्धा नित्या युक्तिपूर्वकं प्रतिपादिताः। नागेशो वाच्यवाचकभावस्य अपरपर्यायभूतं तादात्म्यं शब्दार्थयोः सम्बन्धं स्वीकृतवान्। इत्थं शब्दो नित्यः, अर्थो नित्यः, तयोः सम्बन्धोऽपि नित्य इति शब्दार्थसम्बन्धविषये भाष्ये सिद्धान्तः विहितोऽस्ति।

## सन्दर्भ


कोण्ड भट्ट : *वैयाकरणभूषणसारः,* चौखम्भा सूर्याभारती प्रकाशन, वाराणसी,1998

त्रिपाठी, श्रीराम : *व्याकरणदर्शनम्* सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, 1990

भतृहरि : *वाक्यपदीयम्* :, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1988

भट्ट, नागेश : *परिभाषेन्दुशेखरः,* चौखम्भा सूर्यभारती प्रकाशन, नईदिल्ली, 1998

भट्ट, नागेश : *परमलघुमंजूषा,* चौखम्भा सूर्याभारती प्रकाशन, वाराणसी,1998

भट्ट, नागेश : *लघुशब्देन्दुशेखरेत्यादयः,* चौखम्भा सूर्यभारती प्रकाशन, नईदिल्ली, 1990

भट्ट, नागेश : *लघुमंजूषा,* चौखम्भा सूर्याभारती प्रकाशन, वाराणसी,1998

पतंजलि (सं) : *महाभाष्य पस्पशाह्निकम्,* चौखम्भा संस्कृत प्रतिष्ठान वाराणसी, 2004

गौतम, महर्षि : *न्यायमुक्तावली,* चौखम्भा सूर्यभारती प्रकाशन, नईदिल्ली, 1998